# MP BOARD CLASS 10 SANSKRIT GENERAL MODEL PAPER SET 3 2020

## म.प्र. बोर्ड कक्षा 10 संस्कृत (सामान्य) मोडल पेपर सेट 3 2020

समयः : घण्टात्रयम्] [पूर्णाङ्काः : १००

निर्देशा:-(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नाना सम्मुखे अङ्काः प्रदत्ताः।

प्रश्न १. उचितविकल्पं चित्वा लिखत- १×५ =५

(क) 'अजन्तः' इत्यस्य पदस्य सन्धि-विच्छेदः अस्ति-

(अ) अज + अन्तः (ब) अजा + अन्तः (स) अच् + अन्तः (द) अचा + अन्तः।

(ख) 'परोपकारः' इत्यस्मिन् पदे सन्धिः अस्ति-

(अ) गुणसन्धिः (ब) यणसन्धिः (स) अयादिसन्धिः (द) दीर्घसन्धिः।

(ग) 'उत् + लासः' इत्यस्य पदस्य सन्धिः अस्ति-

(अ) उन्लासः (ब) उल्लासः (स) उतलासः (द) उलाल्सः।

(घ) विसर्गसन्धियुक्तं पदम् अस्ति-

(अ) पुरोहितः (ब) विद्यालयः (स) प्रत्येकः (द) गणेशः।

(ङ) अधोलिखितेषु अव्ययं नास्ति-

(अ) अत्र (ब) तत्र (स) यत्र (द) सत्र।

उत्तर-(क) (स),(ख) (अ), (ग) (ब), (घ) (अ),(ङ) (द)।

प्रश्न २. उचितविकल्पं चित्वा लिखत- १×५=५

(क) 'सचक्रम्' इत्यस्मिन् पदे समासः भवति-

(अ) तत्पुरुषः (ब) अव्ययीभावः (स) द्विगुः (द) कर्मधारयः।

(ख) 'षष्ठीतत्पुरुषस्य' उदाहरणम् अस्ति-

(अ) प्रतिवर्षः (ब) पञ्चपात्रम् (स) कृष्णभक्तः (द) पितरौ।

(ग) 'रूपस्य योग्यम्' इत्यस्य पदस्य समासः अस्ति-

(अ) रूप योग्यम् (ब) रूपं योग्यम् (स) अनुरूपम् (द) योग्यरूपम्।

(घ) 'निर्धनः' इत्यस्मिन् पदे उपसर्गः अस्ति-

(अ) नि (ब) निरा (स) निर् (द) नीर्।

(ङ) अधोलिखितेषु उपसर्गः नास्ति-

(अ) अति (ब) यत्र (स) परि (द) सु।

उत्तर-(क) (ब),(ख) (स), (ग) (स),(घ) (स),(ङ) (ब)।

प्रश्न ३. उचितविकल्यं चित्वा लिखत- १×५=५

(क) "सेवेरन्' इत्यस्मिन् पदे लकारः अस्ति-

(अ) लोट्लकारः (ब) लङ्लकारः (स) लृट्लकारः (द) विधिलिङ्लकारः।

(ख) 'वर्तिष्यामहे' इत्यस्मिन् पदे धातुः अस्ति-

(अ) व (ब) व्रत् (स) वृत् (द) वित्।

(ग) 'गच्छ' इत्यस्मिन् पदे पुरुषः अस्ति-

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः (स) उत्तमपुरुषः (द) अधमपुरुषः।

(घ) 'लप्स्ये' इत्यस्मिन् पदे वचनम् अस्ति-

(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम् (द) त्रिवचनम्।

(ङ) 'त्वं कदा गृहम् आगमिष्यति' इत्यमिन् वाक्ये अव्ययम् अस्ति-

(अ) त्वं (ब) कदा (स) गृहम् (द) आगमिष्यति।

उत्तर-(क) (द), (ख) (स), (ग) (ब), (घ) (अ), (ङ) (ब)।

प्रश्न ४. उचितविकल्पं चित्वा लिखत- १×५=५

(क) 'क्त' प्रत्ययस्य उदाहरणम् अस्ति-

(अ) भ्रमन् (ब) कथितः (स) खादित्वा (द) चलितवान्।

(ख) 'बाल+टाप्' इत्यस्य पदम् भविष्यति-

(अ) बालटा (ब) बालटाप (स) बालिका (द) बाला।

(ग) "गुणवान्' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) मतुप् (ब) तुमुन् (स) क्त्वा (द) शत।

(घ) 'सर्वत्र' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) सर्व (ब) त्रल (स) सर्वा (द) त्राल्।

(ङ) आपदि स्फुरति प्रज्ञा यस्य......."स एव हि-

(अ) वीरः (ब) महावीरः (स) धीरः (द) नीरः।

उत्तर-(क) (ब), (ख) (द), (ग) (अ), (घ) (ब), (ङ) (स)।

प्रश्न ५. प्रदत्तैः शब्दैः रिक्तस्थानपूर्ति कुरुत- १×५=५

(परसदन निविष्टः, अमूल्यधनम्, नादेशे, उदारभावना, वारिधरैः)

(क) संस्कृतसाहित्यं मानवजातेः कृते....."अस्ति।

(ख) हिन्दुधर्म प्रति तस्य....."संसूचयति।

(ग) न नक्तं"........."चरेत्।

(घ) प्रक्रीडितो.........."सुरेन्द्रः।

(ङ) ........"को लघुत्वं न याति ।

उत्तर-(क) अमूल्यधनम्,

(ख) उदारभावना,

(ग) नादेशे, (घ) वारिधरैः,

(ङ) परसदन निविष्टः।

प्रश्न ६. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत- http://www.mpboardonline.com ३×२=६

(क) रघुः कस्मात् हेमराशिं लब्धवान् ?

(ख) मैत्रेयी सीतायै केषां ज्ञानं दत्तवती?

(ग) रथकार : पर्वतदेशे किमर्थं गतः?

(घ) घटोत्कचः अन्ते किं कथयति?

(ङ) मैक्समूलरः संस्कृतविषये किमुक्तवान् ?

प्रश्न ७. अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत- 2

(क) राम-षष्ठी विभक्ति।

(ख) भवत् (पु.)-द्वितीया विभक्तिः।

(ग) अस्मद्- प्रथमा विभक्तिः ।

| | | | |
|---|---|---|---|
| उत्तर- (क) | रामस्य | रामयोः | रामाणाम्। |
| (ख) | भवन्तम् | भवन्तौ | भवतः। |
| (ग) | अहम् | आवाम् | वयमा |

प्रश्न ८.'कस्मात्' अथवा 'पितरः' इति पदस्य विभक्तिं वचनं च लिखत। 2

उत्तर-कस्मात्-पंचमी विभक्तिः एकवचनं च।

पितरः-प्रथमा विभक्तिः बहुवचनं च।

प्रश्न ९. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत- ५×२-१०

(अ) ततःस नित्यमेव दुग्धं गृहीत्वा स्वकुटुम्बंपरिपालयति। अथ रथकारेण वल्लभत्वाद्दा-सेरकग्रीवायां महतीघण्टा प्रतिबद्धा। पश्चाद्रथकारो व्यचिन्तयत्-'अहो! किमन्यैर्दुष्कृतकर्मभिः' यावन्ममैतस्मादेवोष्ट्रपरि-पालनादस्य कुटुम्बस्य भव्यं सञ्जातम्। तत्किमन्येन व्यापारेण।' एवं विचिन्त्य गृहमागत्य प्रियामाह-'भद्रे ! समीचीनोऽयं व्यापारः।

प्रश्न- (i) उज्ज्वलकः नित्यमेव दुग्धं गृहीत्वा कं परिपालयति ?

(ii) रथकारेण महती घण्टा कुत्र प्रतिबद्धा ?

(iii) रथकारः किम् व्यचिन्तयत् ?

(iv) 'भद्रे ! समीचीनोऽयं व्यापारः' इति कः प्रियामाह ?

(v) 'आगत्य' इति शब्दे प्रकृतिं प्रत्ययं च पृथक्कुरुत।

(ब) 'प्रकृतिरपि समयस्य पालनं, कार्यपरायणताम् एव उपदिशति निरन्तरम्'। प्रकृतौ यावन्तः पदार्थाः सृष्टाः सन्ति ते सर्वेऽपि अहोरात्रं कार्यसंलग्ना एव दृश्यन्ते। सूर्य-चन्द्राभ्याम् आरभ्य कीट-पतङ्ग-पिपीलिका-पर्यन्तं सर्वेऽपि स्व-स्व व्यापारे व्यापृताः विलोक्यन्ते। अतः प्रकृत्या अपि इयमेव शिक्षा दीयते यत् नहि केनापि समयस्य अनुपयोगः कर्त्तव्यः इति।

प्रश्न- (i) प्रकृतिरपि किम् उपदिशति ?

(ii) प्रकृतौ यावन्तः पदार्थाः सृष्टाः सन्ति ते अहोरात्रं कस्मिन् संलग्ना एव दृश्यन्ते ?

(ii) सर्वेऽपि कस्मिन् व्यापताः विलोक्यन्ते ?

(iv) कया समयस्य पालनमेव शिक्षा दीयते ?

(v) कस्य अनुपयोगः न कर्त्तव्यः ?

(स) भारते वैदिककाले उपनिषत्काले च नारी शिक्षिता आसीत्। सा न केवलम् अध्ययनम् अपितु सूक्तरचनाः अपि करोति स्म। वैदिककाले अपाला, घोषा, विश्ववारा, मैत्रेयी एतादृश्यः ब्रह्मवादिन्यः आसन्। उपनिषत्काले ताः जीवनविषयकं जगद्विषयकश्च ज्ञानम् अधिगन्तुम् इच्छन्ति स्म। उपनिषत्काले वेदाध्ययनस्य कृते तासाम् उपनयन-संस्कारः अपि क्रियते स्म। "पुरा कल्पे तु नारीणां मौञ्जीबन्धनमिष्यते" इत्यनेन स्मृतिवचनेन तद् ज्ञायते।

प्रश्न- (i) उपनिषत्काले नारी किं किं करोति स्म ?

(ii) वैदिककाले काः ब्रह्मवादिन्यः आसन् ?

(iii) उपनिषत्काले ताः किं इच्छन्ति स्म ?

(iv) तासां कः संस्कार : अपि क्रियते स्म ?

(v) 'ताः' इत्यस्य पदस्य विभक्ति वचनं च लिखत।

प्रश्न १०. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत

५×२=१०

(अ) युवान एष वः परीक्षणस्य काल आगतः

हिमालयस्य रक्षणे समुद्यताः स्थ सर्वतः।

अयं सखा पुरातनोऽस्य भारतस्य विद्यते

स्वकर्मणि प्रवर्तितुं कदापि नैव खिद्यते।

प्रश्न- (i) युवान एष वः कस्य कालः आगतः ?

(ii) कस्य रक्षणे समुद्यताः स्थ सर्वतः ?

(iii) अयं पुरातनोऽस्य भारतस्य कः विद्यते ?

(iv) कस्मिन् प्रवर्तितुं कदापि नैव खिद्यते ?

(v) 'कदापि' इत्यस्य पदस्य सन्धि-विच्छेदं कृत्वा सन्धे नाम लिखत।

(ब) ॐ यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।

दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ।

प्रश्न-(i) कस्य मनः दूरम् उदेति ?

(ii) कः दूरङ्गमम् अस्ति ?

(iii) ज्योतिषाम् एकं ज्योतिः कः ?

(iv) मे मनः किमस्तु ?

(v) 'शिवः' इति शब्दस्य विलोम शब्दं लिखत।

(स) केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,

न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।

वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते,

क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

प्रश्न-(i) चन्द्रोज्ज्वलाः हारा कं न विभषयन्ति ?

(ii) वाण्येका पुरुष किं करोति?

(iii) कानि खलु क्षीयन्ते ?

(iv) सततं भूषणं किम् ?

(v) 'सततं' इति शब्दस्य समानार्थीपदं लिखत।

प्रश्न ११. युग्ममेलनं कुरुत- १×४=४

| (क) | (ख) |
|---|---|
| (क) कालगणना | (i) न कुर्यात् |
| (ख) वेदव्यासः | (ii) खगोलशास्त्रम् |
| (ग) जनः स्वकर्मण्यैव | (ii) महाभारतम् |
| (घ) बालैः सह सख्यम् | (iv) भेल्लस्वामिन् |
| | (v) रतस्तिष्ठिति |

उत्तर-(क)→(ii), (ख) → (iii), (ग) → (v), (घ) → (i)।

प्रश्न १२.शुद्धवाक्यानां समक्षं'आम्' अशद्धवाक्यानां'न' इति लिखत- १×४=४

(क) सत्येन वायुः वाति।

(ख) कात्यायनी सीतायै ज्ञानं दत्तवती।

(ग) रघुः वरतन्तुः शिष्यः आसीत्।

(घ) कश्चित्सिंहो घण्टारवमाकर्ण्य समायातः।

उत्तर-(क) आम, (ख) न, (ग) न, (घ) आम्।

प्रश्न १३. अधोलिखितेषु प्रश्नेषु चतुर्णा प्रश्नानाम् उत्तराणि एकपदेन लिखत- १×४=४

(क) सरगपुत्राः कस्य पुरतः अश्वं दृष्टवन्तः?

(ख) रथकारस्य नाम किम् आसीत् ?

(ग) मार्कण्डेयः नाम ऋषिः कुत्र वसति स्म?

(घ) पठतो किं नास्ति?

(ङ) जलं विना किं न सम्भवम्?

उत्तर-(क) कपिलमुनेः, (ख) उज्ज्वलकः, (ग) गङ्गातीरे, (घ) मूर्खत्वम्, (ङ) जीवनम्।

प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत। ४

प्रश्न १५. स्वप्राचार्यास्य अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत।

अथवा

स्थानान्तरणप्रमाणपत्रार्थे स्वप्राचार्यस्य कृते एक पत्रं संस्कृते लिखत।

प्रश्न १६. अधोलिखितेषु पञ्च अशुद्धकारकवाक्यानां शुद्धिः करणीया- 5

(क) कृषकः ग्रामे गच्छन्ति।

(ख) ग्रामस्य अभितः जनाः भ्रमन्ति।

(ग) अहं पाठशालां गच्छामः।

(घ) श्री रामं नमः।

(ङ) अहं दुग्धं रोचते।

(च) पिता पुत्रस्य सह गच्छति।

प्रश्न १७. अधोलिखितवाक्यानां कथानुसारेण क्रम-संयोजन कुरुत- १×५=५

(१) ग्रामे एकः प्राचीनः विशालः न्यग्रोधवृक्षः आसीत् ।

(२) इदं मदीयः वृक्षः इति काकस्य ध्वनिः अन्तरिक्षं अस्पृशत्।

(३) तस्य शाखायाम् एकः काकः वसन्नासीत्।

(४) अहम् अस्मिन् चिरात् वसामि।

(५) हे बन्धवः श्रूयतां मे वचः।

उत्तर-(१)→(३)→(५)→(४)→(२)।

प्रश्न १८. अधोलिखितम् अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानां उत्तराणि संस्कृतभाषायाम् लिखत- 5

सतां सज्जनानां, सङ्गतिः सम्पर्कः, संसर्गो वा 'सत्सङ्गतिः' इति कथ्यते। वस्तुतः सत्सङ्गात् एव मानवः समुन्नतो भवति। सज्जनानां संसर्गेण जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः भवति। स्थाने एवोक्तं "संसर्गजा दोषगुणाः भवन्ति" इति। अतः स्वसमुन्नतिं इच्छता जनेन सर्वदा सतामेव सङ्गतिर्विधेया।

उपर्युक्तगद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत-

(१) अस्य गद्यांशस्य शीर्षकं लिखत।

(२) केन जनः सज्जनः भवति?

(३) स्वसमुन्नतिम् इच्छता जनेन कि करणीयम् ?

(४) गद्यांशस्यास्य सारं लिखत।

(५) 'दुर्जनः' शब्दस्य विलोम शब्दं लिखत।

प्रश्न १९. अधोलिखितेषु एक विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत- १०

(क) विद्यार्थी जीवनम्, (ख) दीपावलिः , (ग) संस्कृतभाषायाः महत्त्वम्, (घ) अस्माकं देशः।